ज्ञापयिषणीयम्, आजिज्ञापयिष्यम्, ईषदाजिज्ञापयिषः-दुराजिज्ञापयिषः-स्वाजिज्ञापयिषः, आजिज्ञापयिष्यमाणः, आजिज्ञापयिषः, आजिज्ञापयिषितुम्, आजिज्ञापयिषा, आजिज्ञापयिषणम्, जिज्ञापयिषित्वा, आजिज्ञापयिष्य, आजिज्ञापयिषम् २ जिज्ञापयिषित्वा २ ;

## (627) "ज्या वयोहानौ" (IX-क्रयादिः-1499. अक. अनि. पर.)

### प्वादिः, ल्वादिः, ग्रह्यादिश्च ।

[1]ज्यायकः-यिका, [2]ज्यापकः-पिका, [3]जिज्यासकः-सिका, [4]जेजीयकः-यिका ;
ज्याता-त्री, ज्यापयिता-त्री, जिज्यासिता-त्री, जेजीयिता-त्री ;
[5]जिनन्-ती, ज्यापयन्-न्ती, जिज्यासन्-न्ती ; —
ज्यास्यन्-न्ती-ती, ज्यापयिष्यन्-न्ती-ती, जिज्यासिष्यन्-न्ती-ती ; —
— ज्यापयमानः, — जेजीयमानः ;
— ज्यापयिष्यमाणः, — जेजीयिष्यमाणः ;
[6]प्रजीः-प्रज्यौ-प्रज्यः ; — — —
[7]जीनम्-[A]जीनः-जीनवान्, ज्यापितः, जिज्यासितः, जेजीयितः-तवान् ;

---

1. 'आतो युक् चिण्कृतोः' (7-3-33) इति णिति कृति प्रत्यये परे युगागमः । एवं णे, घञि, णमुलि च ज्ञेयम् ।
2. 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ' (7-3-36) इति आदन्तलक्षणः पुगागमो बोध्यः । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
3. द्वित्वे, हलादिशेषे, अभ्यासघटकाकारस्य 'सन्यतः' (7-4-79) इतीत्वम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
4. यङि, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (6-1-16) इति सम्प्रसारणे, पूर्वरूपे, 'हलः' (6-4-2) इति दीर्घे द्वित्वे, अभ्यासस्य गुणे च रूपम् । एवं यङन्ते सर्वत्र प्रक्रियोह्या ।
5. 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः । तस्य ङिद्वद्भावाद् अङ्गस्य सम्प्रसारणम् । पूर्वरूपं दीर्घश्च । 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वः । 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपः ।
6. क्विपि, सम्प्रसारणपूर्वरूपदीर्घेषु सत्सु रूपम् । द्विवचने 'एरनेकाचः—' (6-4-82) इति यण् ।
7. निष्ठायाम्, सम्प्रसारणादिषु सत्सु, 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वम्

A. 'इत्थं हरौ गृणति हस्तिपकोऽपि कोपी
जीनोऽप्यहं न तु रिणामि भियेति वादी ।' धा. का. 3.8.